International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 12-15
© 2026 IJMH
www.themultijournal.com

Received: 19-08-2026
Accepted: 03-09-2026
Publish : 05-09-2026

**आचार्यः पङ्कजकुमारव्यासः**
अध्यक्षः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः (आ.प्र.) ५१७५०७

**Correspondence:**
**आचार्यः पङ्कजकुमारव्यासः**
अध्यक्षः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः (आ.प्र.) ५१७५०७

# धात्वर्थसिद्धान्तमीमांसा

**आचार्यः पङ्कजकुमारव्यासः**

**प्रस्तावना –** तत्र शाब्दबोधविचारवेलायां धात्वाख्यातार्थ-लकारार्थ-सुबर्थ-निपातार्थादिविषयेषु यथा शाब्दिकाः स्वशास्त्रसम्प्रदायानुसारेण तत्तदर्थनिरूपणाय प्रवर्तमाना दृश्यन्ते। तथैव नैयायिक-मीमांसकादयः तन्त्रान्तरीया अपि समं प्रवर्तन्ते तत्तदर्थनिरूपणाय स्वसम्प्रदायरीतिमवलम्ब्य। अत एवार्थिकविचारेषु परस्परममीषां शास्त्रकाराणां भृशं दृश्यते वैषम्यं, क्वचित्साम्यं चापि।

शब्दशास्त्रे शब्दस्यैव परमप्रामाण्यमिति शाब्दिका आमनन्ति। ऋते तु शब्दान्न किञ्चिदपि भासते लोके। यतो लोके न किमपि ज्ञानं शब्दविरहितं भवति। उक्तं यथा वाक्यपदीये -

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।"** इति।।[1]

इत्थमभियुक्तोक्त्या शाब्दबोधसरण्यां शब्दस्य प्राधान्यं निर्विवादमेव। अत्रेदमवधेयं यत्सर्वेषां शब्दानां धातुयोनित्वमामनन्ति शब्दतत्त्वविदः। वैयाकरणसिद्धान्तनिष्णातेष्वन्यतमः शाकटायनोऽप्येतदेव ब्रवीति। अत्र प्रमाणं निरुक्तकृद्यास्कवचनं "सर्वं नाम च धातुजमाह"[2] तथैव महर्षिपतञ्जलिरपि "नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्"[3] इति। अतो निखिलशब्दव्युत्पादने धातुरेव मूलाधार इति फलति। अत एव को नाम धात्वर्थ इति जिज्ञासाशमनाय न केवलं शाब्दिका अपितु मीमांसकादयः शास्त्रान्तरीया अपि धात्वर्थं निर्णेतुं प्रायतन्त। प्रबन्धेऽस्मिन् समेषां मतानुवादपूर्वकं वैयाकरणसिद्धान्providernताविष्करणाय ईषदेष प्रयासः।

तत्र यथाप्रतिज्ञं क्रमशः मतान्तरानुवादोपन्यासपूर्वकं तत्तन्मतं निरस्य वैयाकरणसिद्धान्त उपस्थाप्यते। तथा हि -

**फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति मण्डनमिश्रमतानुवादः तत्खण्डनञ्च –**

वैयाकरणैः फले व्यापारे च शक्तिरङ्गीक्रियते "एवं तिङ्प्रत्ययस्य कर्तरि, कर्मणि, संख्यायां काले च शक्तिः स्वीक्रियते"[4] **मण्डनमिश्रास्तु –** फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति वदन्ति। **तेषामयमभिप्रायः–** १. चैत्रस्तण्डुलं पचति, चैत्रस्य पाकः, चैत्रो मैत्रेण पाचयतीत्यादौ धातुप्रकृतिकप्रत्ययान्ते फलव्यापारयोः भानं सर्वसंमतम्। परन्तु उभयोः धातुवाच्यत्वस्वीकारे धातोर्नानार्थकतापत्तिः। अतः धातोः फले, प्रत्ययस्य च व्यापारे शक्तिः स्वीकार्या। अत एव पचतीत्यादितः फलप्रकारकभावनाविशेष्यकबोधो जायते। व्यापारस्य धात्वर्थत्वे तु तदनुपपत्तिरेव। २. एवं "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इत्यभियुक्तोक्तिरपि अस्माकं मते सङ्गच्छते। ३. धातुभ्यः कृतां स्वल्पसंख्याकतया बहुसंख्याकधातूनां नानार्थकतास्वीकारापेक्षया अल्पसंख्याकानां कृतामेव व्यापारवाचकत्वे लाघवं वर्तते। ४. किञ्च व्यापारेण स्वाश्रयस्य आक्षेपात् कर्तुरभिधानम्, कर्माख्याते प्रधानेन फलेन स्वाश्रयाक्षेपात् कर्मणोऽभिधानम्। एवञ्च कर्तृकर्मणोः आख्यातवाच्यत्वावाच्यत्वाभ्यां न तयोरभिधानानभिधानव्यवस्था। किन्तु फलव्यापाराभ्यां तयोराक्षेपा-नाक्षेपाभ्यामतो न दोष इति। स्पष्टमिदं मीमांसकमतानुवादसन्दर्भे परमलघुमञ्जूषायां[5] लघुमञ्जूषायाञ्च[6] धात्वर्थप्रकरणे।

**नागेशाशयस्तु -** १. "लः कर्मणी" (पा.सू. ३-४-६९)त्यनुशासनेन विरोधात् व्यापारः प्रत्ययार्थो न भवति। २. किञ्च पचति, पचते, पक्ष्यति, पक्वान् इत्यादौ फूत्कारादीनां प्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षया एकस्य धातोरेव तत्कल्पना उचिता। ३. किञ्च फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचादिसमभिव्याहारस्यापि कारणत्वकल्पने गौरवम्। किञ्च "अनभिहिते" (पा.सू.२-३-१) इत्यधिकारे विभक्तिविधानं दृश्यते । यथा चैत्रेण पच्यते तण्डुलः, चैत्रः पचति तण्डुलमिति। आद्ये तिङा कर्तुः, द्वितीये कर्मणश्च अनभिधानात् तृतीया द्वितीया च प्रवर्तेते इति

शाब्दिकमते कर्तृकर्मणोः अभिधानानभिधानव्यवस्था सूपपादा। आख्यातस्य व्यापारार्थकत्ववादिनस्तव मते निरुक्तव्यवस्थायाः उच्छेदः स्पष्ट एव। सर्वत्रापि कर्तृकर्मणोः तिङाऽनभिधानात् तृतीयाद्वितीये प्रवर्तेयाताम्। ५. किञ्च व्यापारेण स्वाश्रयस्याक्षेपात् कर्तुरभिधानमिति, कर्माख्याते प्रधानेन फलेन स्वाश्रयस्य आक्षेपात् कर्मणोऽभिधानमिति न युक्तम्। जात्याक्षिप्तव्यक्तेरिवाश्रयस्य प्राधान्यापत्तौ "क्रियाप्रधानमाख्यातम्" इति यास्कवचनविरोधापत्तेः। ६. किञ्च फलस्य धातुना, तदाश्रयस्याक्षेपेणैव लाभसम्भवेन "लः कर्मणि" (पा.सू. ३-४-६९) इत्यस्य वैयर्थ्यापत्तिः। ७. किञ्च गुरुः शिष्याभ्यां पाचयतीत्यादौ "हेतुमति च" (पा.सू. ३-१-२६) इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते, प्रयोज्यव्यापार आख्यातार्थो वाच्यः। एवञ्च संख्याया एकत्वस्य स्ववाचकाख्यातार्थव्यापारान्वयिनि कर्तर्येवान्वयात् "शिष्याभ्याम्" इति द्विवचनानापत्तिः। पाचयतीत्येकवचनानापत्तिश्च। गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च। शिष्यशब्दात् तदापत्तेश्च।

एवञ्च उपरिनिर्दिष्टहेतुभिः फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति मण्डनमिश्रमतं न समीचीनमिति **नागेशस्याशयः**।[7]

**धात्वाख्यातार्थविषये नैयायिकमतं तत्खण्डनञ्च –**

**नैयायिकास्तु –** फलव्यापारौ धात्वर्थः, लकाराणां कृतावेव शक्तिः, लाघवात्। नानाकृतिषु अनुगतायाः कृतित्वजातेः किञ्चिद्विशेषितायाः शक्यतावच्छेदकत्वे उपस्थितिकृतलाघवं वर्तते, न तु कर्तरि। कृतिमतः कर्तृत्वेन तत्र शक्तौ, कृतिः शक्यतावच्छेदिका प्रतिकर्तृ भिन्ना भिन्नेति, शक्यतावच्छेदकधर्माणामानन्त्येन गौरवात्। प्रथमान्तपदेनैव तल्लाभाच्च। आख्यातार्थे धात्वर्थो विशेषणम्। अनुकूलत्वमाश्रयत्वञ्च संसर्गः । तथा च चैत्रः पचतीत्यादौ विक्लित्त्यनुकूलव्यापारानुकूलकृतिमान् चैत्र इति बोधः। रथो गच्छतीत्यादौ रथस्याचेतनत्वात् यत्नशून्यत्वेन व्यापारे आख्यातस्य लक्षणेत्याहुरिति नैयायिकमतानुवादो मञ्जूषाभूषणसारादिग्रन्थेषु[8]।

**अत्र नागेशः –** युष्मदस्मदोः लकारेण सामानाधिकरण्याभावात् पुरुषव्यस्थानापत्तेः। पचन्तं चैत्रं पश्य, पचमानाय देवदत्ताय देहीत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशाविशेषेण, तेभ्यः कृतिमात्रबोधापत्तेश्च। ननु शत्रादीनां कर्तरि शक्तिः, तिबादीनां कृतावेवेति चेत् – न। तिबादीनां, शत्रादीनां च स्थानी लकार एव भवतीति, शत्राद्यन्ते कर्तरि, तिबाद्यन्ते कृतिरूपार्थे च शक्तिबोधनस्यान्याय्यत्वात्। किञ्च "कर्तरि कृत्" (पा.सू.३-४-६७) इति सूत्रे कर्तरीति पदस्य धर्मिप्रधानत्वात् "लः कर्मणि च" (पा.सू.३-४-६९) इति सूत्रेऽपि धर्मिप्रधानपरतयैव बोधः कल्पनीयः। किञ्च लकारस्य कृतिवाचकत्वे रथो गच्छतीत्यादौ आश्रये लक्षणास्वीकारे गौरवापत्तिः। अभिहितत्वानभिहितत्वव्यवस्थोच्छेदापत्तेश्च। किञ्च यत्नोऽपि व्यापारसामान्यं धातुत एव लभ्यते। "स्थालीस्थे यत्ने पचिना कथ्यमाने" इति कारके (पा.सू.१-४-२३) इति सूत्रे भाष्ये[9] प्रयोगात्, अनन्यलभ्यस्यैव शब्दार्थत्वात् कृतौ शक्तेरुक्तिसम्भव एव नास्ति। एवञ्च फलानुकूलयत्नसहितो व्यापार एव धात्वर्थ इति नागेशस्याशयः। तथा हि – फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। आख्यातार्थे धात्वर्थो विशेषणं नैव भवितुं शक्नोति। प्रकृतिप्रत्यययोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यमित्युत्सर्गः। यतः प्रत्ययवाच्यस्यैवार्थस्य प्राधान्यम्, प्रत्ययद्योत्यस्य तु अप्राधान्यमेव। तस्योत्सर्गस्य "भावप्रधानमाख्यातम्" इति यास्कवचनमपवादः। तेन आख्याते = तिङन्ते धातूपात्तक्रियाया एव प्राधान्यम्, न तु प्रत्ययार्थस्येति सिद्धम्।

यत्तु आख्यातपदेन तिङ्मात्रग्रहणात् भावप्रधानमित्यत्र षष्ठीतत्पुरुषाश्रयाणात् प्रत्ययार्थप्राधान्यमेव फलति। यथा भावप्रधानम् इत्यत्र, भावस्य = धात्वर्थक्रियायाः, निरूपितत्वं षष्ठ्यर्थः, तस्य प्रधानैकदेशप्राधान्येऽन्वयः, एवञ्च भावनिष्ठप्रकारतानिरूपितप्रत्ययार्थनिष्ठविशेष्यताकबोधजनकमाख्यातम् इत्यर्थः इति चेत्। न। "आख्यातमाख्यातेन क्रियासातत्ये"[10] इति गणसूत्रे आख्यातपदेन तिङन्तस्यैवग्रहणात्। उत्सर्गेणैव निर्वाहे यास्ककृतापवादवचनवैयर्थ्यापत्तेश्च। तस्मात् भावप्रधानम् इत्यत्र बहुव्रीहिः। आख्यातपदेन तिङन्तस्यैव ग्रहणमिति नागेशाशयः।[11]

**नैयायिकोक्तप्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधनिराकरणम्**

न्यायनये धात्वर्थविशेष्यकबोधस्य सर्वत्रानभ्युपगमेन, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्यैवा-भ्युपगमात् "चैत्रस्तण्डुलं पचती"त्यत्र तिङ्वाच्यकृतिः प्रथमान्तार्थे चैत्रादौ प्रकारीभूय भासते। धात्वर्थव्यापारस्तु कृतौ अनुकूलतासम्बन्धेन प्रकारतया भासते। तथा च तण्डुलकर्मकविक्लित्त्यनुकूल-वर्तमानकालिकव्यापारानुकूलकृत्याश्रयश्चैत्रः इति बोधो जायते। एवमेव 'पश्य मृगो धावती'ति वाक्यादपि 'अन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमाँस्त्वम्' इति बोधो जायते। वैयाकरणानां मते तु – व्यापारस्य प्राधान्यात्, उत्कटधावनक्रियाया एव मुख्योद्देश्यत्वात् मृगकर्तृकं धावनं दृशिक्रियायां कर्म, प्रधानं दृशिक्रियैव। तथा च – मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति बोधः। तत्र मृगो धावतीत्यत्र विशेष्यभूतधावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावात् न द्वितीया। कर्म तु संसर्गमर्यादया भासते। नैयायिकमते तु विशेष्यभूतार्थवाचकमृगशब्दस्य प्रातिपदिकत्वात् दृशिक्रियाकर्मत्वाच्च द्वितीयापत्तौ धावन्तं मृगं पश्येतिवत् "पश्य मृगं धावती"त्यापत्तेः। ननु विशिष्टार्थवाचकस्य धावति मृग इति वाक्यस्य कर्मत्वेऽपि पृथङ्मृग इत्यस्य प्रातिपदिकस्य कर्मत्वाभावात् न द्वितीयेति चेत् न। "अनभिहिते" (पा.सू. २-३-१) इत्यधिकारसूत्रप्रघट्टके - अभिधानञ्च "तिङ्कृत्तद्धितसमासैः" इत्येतत् परिगणनप्रत्याख्यानपरभाष्यरीत्या द्वितीयापत्तेः। सर्वेषां कारकाणां भावनान्वयनियमेन धावति मृग इत्यत्र उभयोः कर्मत्वे धावतीत्यस्य प्रातिपदिकत्वाभावात्, मृगशब्दात् द्वितीया दुर्वारैव। शाब्दिकमते तु क्रियाविशेषणत्वेन अर्थान्तरे निराकांक्षत्वात् मृगशब्दान्न द्वितीया। एवञ्च व्यापारमुख्यविशेष्यकशाब्दबोध एवाङ्गीकार्य इति वैयाकरणसिद्धान्तः। स्पष्टमिदं भूषणसारे[12] परमलघुमञ्जूषायां[13] च धात्वर्थप्रकरणे।

**धात्वर्थविषये वैयाकरणसिद्धान्तः**

वैयाकरणैः धातोः फले व्यापारे च शक्तिरङ्गीक्रियते। एवं तिङ्प्रत्ययस्य कर्तरि, कर्मणि, संख्यायां काले च शक्तिः निर्धार्यते। तत्र भूवादिसूत्रे भाष्ये[14] – "क्रियावचनो धातुः, का पुनः क्रिया ? ईहा; का पुनरीहा ? चेष्टा; का पुनश्चेष्टा ? व्यापारः; कथं ज्ञायते

क्रियावचना: पचादय इति ? यदेतेषां करोतिना सामानाधिकरण्यम्; किं करोति ? पचति" इति भाष्ये पचादिधातूनामेव सामानाधिकरण्यस्य प्रदर्शनात्, एवं "भावप्रधानमाख्यातम्" "सत्त्वप्रधानानि नामानि" इति निरुक्तात्, एवं क्रियाप्राधान्यबोधक "पचति भवति" इति भाष्याच्च धातोः व्यापारे शक्तिरङ्गीक्रियते।

एवं "पचेः कः प्रधानार्थः? यासौ तण्डुलानां विक्लित्तिः" इति "हेतुमति च" (पा.सू. ३-१-२६) इति सूत्रस्थभाष्येण[15], "पचतीत्युक्ते कश्चिदर्थो गम्यते विक्लित्तिः" इति भूवादिसूत्रस्थभाष्येण[16] च धातोः फलेऽपि शक्तिः कल्प्यते। एवं "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा.सू.३-४-६९) इति सूत्रे "कर्तरि कृत्" (पा.सू.३-४-६७) इति सूत्रात् कर्तरीत्यस्यानुवृत्तेः, "तान्येकवचनद्विवचनबहुवचनान्येकशः" (पा.सू.१-४-१०२) इति सूत्रेण, "वर्तमाने लट्" (पा.सू.३-२-१२३) इत्यादिसूत्रैश्च तिङ्प्रत्ययानां कर्तरि, कर्मणि, संख्यायां काले च शक्तिः निर्णीयते। अत एव भट्टोजिदीक्षितैः –

**"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥"**

इति कारिकया[17] व्याकरणसिद्धान्तः प्रतिपादितः।

तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। फलत्वं[18] च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति, तद्धात्वर्थनिष्ठ-विशेष्यतानिरूपितप्रकारतावत्त्वम्। "देवदत्तः तण्डुलं पचति" इत्यत्र समन्वयः – तद्धातुः = प्रकृतपच्यादिधातुः, तदर्थो यो व्यापारः = पाकानुकूलव्यापारः, तज्जन्यत्वं विक्लित्तिरूपे फले, एवं तद्धात्वर्थः = प्रकृतधात्वर्थो व्यापारः, तत्र शाब्दबोधीयविशेष्यतासत्त्वेन तन्निरूपितप्रकारता फले विक्लित्त्यादावक्षतेति लक्षणसमन्वयः। कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यतैव। व्यापारत्वञ्च धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम्। अनुकूलत्वं संसर्गः । अनुकूलत्वं च फलनिष्ठजन्यतानिरूपित-जनकतावत्त्वम्।

धातोः फलव्यापारयोः पृथक् शक्तिरिति दीक्षितानामाशयः[19]। अत एव तण्डुलं पचतीत्यादौ द्वितीयार्थस्य कर्मणः धात्वर्थफलेऽन्वयः उपपद्यते। अन्यथा फलस्य पदार्थैकदेशतया तत्र तदन्वयानुपपत्तिः स्पष्टैव। एकपदोपस्थाप्ययोरपि फलव्यापारयोः परस्परमन्वयः व्युत्पत्तिवैचित्र्यात्।

**नागेशाशयस्तु**[20] – फलव्यापारयोः धातोः पृथक् शक्तौ उद्देश्यविधेयभावेन अन्वयापत्तिस्तयोः स्यात्। पृथगुपस्थितयोः तथा अन्वयस्यौत्सर्गिकत्वात्। किञ्चैकपदे व्युत्पत्तिद्वयकल्पने गौरवम्। तथाहि – फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातु-जन्योपस्थितिः कारणम्, व्यापारविशेषणकफलबोधे कर्मप्रत्ययस-मभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारण-भावद्वयकल्पनं, धातोरर्थद्वये शक्तिद्वयकल्पनम्, च अतिगौरवम्। तस्मात् फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च धातूनां शक्तिः, कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इति नागेशसिद्धान्तः॥

अत्र बहवो व्याख्यातारः फले व्यापारे च धातोः खण्डशः शक्तिरिति प्राचीनमतमेव ज्याय इत्यभिप्रयन्ति। उद्देश्यविधेयभावेनान्वय-नियामकव्युत्पत्तौ धातुभिन्नत्वनिवेशेनादोषः। फलविशेष्यकबोधं प्रति कर्मप्रत्ययसमभिव्याहारः व्यापारविशेष्यकबोधं प्रति कर्तृप्रत्ययसमभिव्याहारश्च कारणमिति कार्यकारणभावद्वयक-ल्पनमपि नापेक्षितम्, एकवृन्तगतफलद्वयन्यायेन फलव्यापारयोः उभयोरपि पर्यायेण विशेष्यत्वं विशेषणत्वञ्चोपपाद्यमिति वदन्ति।[21]

वस्तुतो नव्यमतमत्र युक्तमिति वक्तव्यम्। यद्यपि कौण्डभट्टेन कर्मतिङन्तेऽपि व्यापारमुख्यविशेष्यक एव शाब्दबोधो वर्णितः, तथापि "सुप आत्मनः क्यच्" (पा.सू.3.1.8) इत्यादिसूत्रभा-ष्यकैयटपर्यालोचनया नव्यवैयाकरणमतस्यैव साधीयता प्रतीयते। तस्मात् कर्मतिङन्ते फलमुख्यविशेष्यक एव शाब्दबोधो युक्तः। 'भावप्रधानमाख्यातम्' इति निरुक्तमप्यत्रानुकूलमेव। अत्र भावपदस्य 'दुर्गावृत्त्याम्' अर्थद्वयं प्रदर्शितम्। एकः भवतीति भावः फलम्। अन्यः भावयतीति भावो व्यापारः । तस्मादर्थद्वयस्यापि व्यवस्थया एकत्र व्यापारविशेष्यकत्वम्, अन्यत्र फलविशेष्यकत्वमित्यपि वक्तुं शक्यम्। भावो धात्वर्थः। तस्य मुख्यविशेष्यत्वमित्यपि योजना नव्यपक्षसाधिकैव। एवञ्च फलमुख्यविशेष्यकबोधे प्रमाणाभाव इति निरस्तम्। स्पष्टमिदं भूषणसारतत्त्वप्रकाशिकायाम्।[22]

**अयमत्रसंक्षेपोपसंहारः – अत्र मीमांसकाः** – फलमात्रं धात्वर्थः, व्यापार आख्यातप्रत्ययार्थः। शाब्दबोधे आख्यातार्थव्यापारस्य प्राधान्यम्। यथा – देवदत्तः पचतीत्यत्र देवदत्ताभिन्नैककर्तृकवर्तमान-कालिकविक्लित्त्यनुकूलो व्यापार इति।

**प्राचीननैयायिकाः** – धातोरर्थो व्यापारमात्रम्। विक्लित्तिः फलं द्वितीयाया अर्थः। शाब्दबोधे प्रथमान्तार्थस्य प्राधान्यम्।

**नव्यनैयायिकास्तु** – फलव्यापारौ धात्वर्थः (फलावच्छिन्नः व्यापार इत्यर्थः)। शाब्दबोधे प्रथमान्तार्थस्य प्राधान्यम्। तेन देवदत्त ओदनं पचतीत्यत्र ओदनकर्मकविक्लित्त्यनुकूलव्यापारानु-कूलकृतिमान् देवदत्त इति बोधः।

**प्राचीनवैयाकरणाः** – फलव्यापारौ धात्वर्थः। आख्यातार्थः तिङर्थः कर्तृकर्माश्रयः। फले व्यापारे च खण्डशः शक्तिः एकवृन्तगतफलद्वयन्यायेन। शाब्दबोधे व्यापारस्य प्राधान्यम्। तेन देवदत्त ओदनं पचति इत्यतो देवदत्ताभिन्नैककर्तृक-ओदनकर्मक-वर्तमान-कालिकविक्लित्त्यनुकूलो व्यापार इति बोधो भवति। प्राचीनानां मते कर्तृवाच्यस्थले कर्मवाच्यस्थले च शाब्दबोधे व्यापारस्यैव प्राधान्यं तेन समानो बोधो देवदत्तेन ओदनः पच्यत इत्यत्रापि।

**नव्या नागेशादयः** – फलव्यापारौ धात्वर्थः। विशिष्टा शक्तिः स्वीक्रियते तथा च फलावच्छिन्नव्यापारः, व्यापारावच्छिन्न-फलं धात्वर्थ इति। कर्तृप्रत्ययस्थले फलविशिष्टव्यापारविशेष्यकः, कर्मप्रत्ययस्थले व्यापारविशिष्टफलविशेष्यकः शाब्दबोधः। एवञ्च 'देवदत्त ओदनं पचति' इत्यत्र प्राचीनानां नव्यानां च समानः शाब्दबोधः। परन्तु 'देवदत्तेन ओदनः पच्यते' इत्यत्र नव्यानां मते देवदत्तवृत्ति-वर्तमानकालिक-व्यापारजन्या ओदननिष्ठा विक्लित्तिः इति बोधः इति भेदः।

इत्थं मीमांसकनैयायिकादीनाम्मतानुवादतत्खण्डनपुरस्सरं धात्वर्थ-विषये वैयाकरणसिद्धान्त आविष्कृत इति शम्।

**परामृष्टानां ग्रन्थानां सूची—**

1. नागेशभट्टः। ***परमलघुमञ्जूषा।*** भावप्रकाशिका, बालबोधिनी-संस्कृत-हिन्दीव्याख्योपेता। कृष्णदास-संस्कृत-सीरीज्- ५०। व्याख्याता सम्पादकश्च जयशङ्करलाल-त्रिपाठी, वाराणसी; चौखम्बा-कृष्णदास-अकादमी, २०११ (चतुर्थसंस्करणम्)।

2. नागेशभट्टः। ***वैयाकरणसिद्धान्तलघुमञ्जूषा।*** प्रथमो भागः। दुर्बलाचार्यविरचित'कुञ्जिका'ख्यया बलरामभट्टविरचित'कला'ख्यया च टीकाद्वयेन सम्वलिता। चौखम्बा-संस्कृत-सीरीज्- ४४। सटिप्पण-सम्पादकाः माधवशास्त्रिभण्डारी, नरहरिशास्त्रिपेण्डसे प्रभृतयः, वाराणसी; चौखम्बा-संस्कृत-सीरीज-आफिस्, १९८९ (द्वितीयसंस्करणम्)।
3. नागेशभट्टः। ***वैयाकरणसिद्धान्तलघुमञ्जूषा।*** (धात्वर्थ-निपातार्थ-प्रातिपदिकार्थ-सुबर्थ-वृत्तिविचाराः)। पेरि-सूर्यनारायणशास्त्रिविरचितया 'नागेशभावप्रकाश'व्याख्यया सहिता। राष्ट्रियसंस्कृत-विश्वविद्यालयग्रन्थमाला- ३३७। सम्पादको जानमद्दि-रामकृष्णः, तिरुपतिः; राष्ट्रियसंस्कृतविश्वविद्यालयः, २०२१।
4. पतञ्जलिः। ***व्याकरणमहाभाष्यम्।*** तृतीयखण्डः। नागोजिभट्टविरचित'महाभाष्यप्रदीपोद्द्योतो'द्भासितेन, कैयटोपाध्यायविरचितेन 'प्रदीपे'न, गुरुप्रसादशास्त्रिकृतया टिप्पण्या च संयोजितम्। सम्पादको गुरुप्रसादशास्त्री, दिल्ली; प्रतिभा-प्रकाशनम्, १९९९ (पुनर्मुद्रितसंस्करणम्), १९३८ (प्रथमसंस्करणम्)।
5. पतञ्जलिः। ***व्याकरणमहाभाष्यम्।*** प्रथमखण्डस्य द्वितीयो भागः। नागोजिभट्टविरचित'महाभाष्यप्रदीपोद्द्योतो'द्भासितेन, कैयटोपाध्यायविरचितेन 'प्रदीपे'न, गुरुप्रसादशास्त्रिकृतया टिप्पण्या च संयोजितम्। सम्पादको गुरुप्रसादशास्त्री, दिल्ली; प्रतिभा-प्रकाशनम्, १९९९ (पुनर्मुद्रितसंस्करणम्), १९३८ (प्रथमसंस्करणम्)।
6. कौण्डभट्टः। ***वैयाकरणभूषणसारः।*** शंकरशास्त्रिप्रणीतया 'शांकरी'व्याख्यया विभूषितः। आनन्दाश्रमसंस्कृतग्रन्थावलिः- १३५। सम्पादकः शंकरशास्त्री, पुणे; आनन्दाश्रममुद्रणालयः, १९५७।
7. कौण्डभट्टः। ***वैयाकरणभूषणसारः।*** पेरिसूर्यनारायणशास्त्रिकृतया 'तत्त्वदर्शिनी'व्याख्यया विमण्डितः। श्रीवेङ्कटेश्वरवेदविश्वविद्यालयसीरीज्- १०१। सम्पादकः कोम्पेल्ल-सत्यनारायणशास्त्री, तिरुपतिः; श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, २०१६।
8. रामकृष्णमाचार्यः, कं. वे.। ***भूषणसारतत्त्वप्रकाशिका।*** राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला- २१४। सम्पादको हरेकृष्णशतपथी, तिरुपतिः; राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

**पाद टिप्पणी –**

1 वा.प.ब्रह्मकाण्डम्, कारिका १२४

2 "तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च।" इति निरुक्ते प्रथमे अध्याये प्रथमे पादे।

3 "नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्। यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।। इति व्याकरणमहाभाष्ये "उणादयो बहुलम्" (3-3-1) इति इति सूत्रे श्लोकवार्तिकम्।

4 धात्वर्थप्रकरणे, शांकरीयुक्तभूषणसारे पृ.सं. 20-32

5 धात्वर्थप्रकरणे, परमलघुमञ्जूषायाम् पृ.सं. 103

6 धात्वर्थप्रकरणे, सिद्धान्तलघुमञ्जूषायाम् (प्रथमो भागः) पृ.सं. 531-532

7 धात्वर्थप्रकरणे, परमलघुमञ्जूषायाम् पृ.सं.103-108, सिद्धान्त-लघुमञ्जूषायाम् (प्रथमो भागः) पृ.सं. 532

8 धात्वर्थप्रकरणे, परमलघुमञ्जूषायाम् पृ.सं.126, सिद्धान्त-लघुमञ्जूषायाम् (प्रथमो भागः) पृ.सं.535-537, शांकरी-युक्तभूषणसारे पृ.सं.24

9 "एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा। इत्यादि..." "कारके" 1-4-23 इति सूत्रे भाष्ये सर्वेषां कारकाणां स्वस्वव्यापारे स्वातन्त्र्यविवक्षा-निरूपणप्रसङ्गे। पृ.सं. 352 (प्रथमखण्डः द्वितीयभागः)

10 "मयूरव्यंसकादयश्च" 2-1-72 इति सूत्रे गणसूत्रमेतत्।

11 "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च" इति यास्केन पदानां विभागनिरूपणे आख्यातमिति शब्दः उपात्तः। तिङन्तस्यैव पदत्वात् तत्र तिङन्तम् आख्यातपदेन बोध्यमिति ज्ञायते। एवमेवान्यत्र निरुक्तौ "सर्वमाख्यातजं नाम" इति वाक्येऽपि आख्यातपदं श्रूयते। सर्वं प्रातिपदिकं धातुजमित्यर्थे तद्वाक्यं प्रसिद्धिमिति हेतोः आख्यातपदेन धातुरेव ग्राह्यः। किञ्च "भावप्रधानमाख्यातम्" इति निरुक्तौ आख्यायते प्रधानीभूतोऽर्थः अनेनेति विग्रहेण आख्यातशब्दः धातुपर इति भूषणसारव्याख्यायां तत्त्वदर्शिन्यां श्रीपेरिसूर्यनारायणशास्त्रिचरणाः।

12 शांकरीयुक्तभूषणसारे पृ.सं. 40-43

13 परमलघुमञ्जूषायां पृ.सं. 136

14 भूवादिसूत्रभाष्ये पृ.सं. 158 (प्रथमखण्डः द्वितीयभागः)

15 हेतुमति चेति सूत्रभाष्ये पृ.सं. 84 (तृतीयखण्डः)

16 इह 'पचती'त्युक्ते कश्चिच्छब्दः श्रूयते पच्छब्दश्चकारान्तः, 'अति'शब्दश्च प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते – विक्लित्तिः, कर्तृत्वमेकत्वञ्चेति भूवादिसूत्रभाष्ये पृ.सं. 162 (प्रथमखण्डः द्वितीयभागः)

17 दीक्षितविरचितवैयाकरणमतोन्मज्जनकारिका – 2, भूषणसारे व्याख्याता श्रीकौण्डभट्टेन।

18 अत्रेदं वक्तव्यम् – फललक्षणमिदं बहवो भूषणग्रन्थव्याख्यातारो नागेशप्रणीतलघुमञ्जूषास्थसुबर्थविचारोक्तरीत्या परिष्कुर्वन्ति। परन्तु दीक्षितस्य नेदमिष्टं, दीक्षितरीत्या कर्तृप्रत्ययस्थले कर्मप्रत्ययस्थले च व्यापारविशेष्यकसमानशाब्दबोधाङ्गीकारात् तत्त्वदर्शिनीकाराः आचार्याः श्रीपेरिसूर्यनारायणशास्त्रिचरणास्तु "कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वमिति" परिष्कुर्वन्ति। शांकरीकारस्तु 'कर्तृप्रत्ययस-मभिव्याहारे' इत्युपलक्षणं न तु विशेषणमित्यादिना दीक्षितोक्तकौण्डभट्टाभिमतं साधयति (पृ.सं. 11)।

19 वैयाकरणभूषणसारे धात्वर्थप्रकरणे

20 लघुमञ्जूषायां धात्वर्थविचारे, परमलघुमञ्जूषायां च धात्वर्थनिरूपणे

21 भूषणसारशांकरीव्याख्याने पृ.सं. 9

22 भूषणसारतत्त्वप्रकाशिकायां धात्वाख्यातार्थनिर्णये पृ.सं. 104